# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ७७

युध्यमानौ तु तौ दृष्ट्वा प्रसक्तौ नरराक्षसौ ।
शूरः स रावणभ्राता तस्थौ सङ्ग्राममूर्धनि ॥१॥

ततो विस्फारयामास महद्धनुरवस्थितः ।
उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥२॥

ते शराः शिखिसङ्काशा निपतन्तः समाहिताः ।
राक्षसान्दारयामासुर्वज्रा इव महागिरीन् ॥३॥

विभीषणस्यानुचरास्तेऽपि शूलासिपट्टसैः ।
चिच्छेदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ॥४॥

राक्षसैस्तैः परिवृतः स तदा तु विभीषणः ।
बभौ मध्ये प्रहृष्टानां कलभानामिव द्विपः ॥५॥

ततः सञ्चोदयानो वै हरीन्रक्षोरणप्रियान् ।
उवाच वचनं काले कालज्ञो रक्षसां वरः ॥६॥

एकोऽयं राक्षसेन्द्रस्य परायणमिव स्थितः ।
एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ॥७॥

अस्मिन्विनिहते पापे राक्षसे रणमूर्धनि ।
रावणं वर्जयित्वा तु शेषमस्य बलं हतम् ॥८॥

प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः ।
कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः ॥९॥

अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः ।
कम्पनः सत्त्ववन्तश्च देवान्तकनरान्तकौ ॥१०॥

एतान्निहत्यातिबलान्बहून्राक्षससत्तमान् ।
बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥११॥

एतावदिह शेषं वो जेतव्यमिह वानराः ।
हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥१२॥

अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम ।
घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥१३॥

हन्तुकामस्य मे बाष्पं चक्षुश् चैव निरुध्यते ।
तदेवैष महाबाहुर्लक्ष्मणः शमयिष्यति ।
वानरा घ्नन्तु सम्भूय भृत्यानस्य समीपगान् ॥१४॥

इति तेनातियशसा राक्षसेनाभिचोदिताः ।
वानरेन्द्रा जहृषिरे लाङ्गलानि च विव्यधुः ॥१५॥

ततस्ते कपिशार्दूलाः क्ष्वेडन्तश्च मुहुर्मुहुः ।
मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेव बर्हिणः ॥१६॥

जाम्बवानपि तैः सर्वैः स्वयूथैरभिसंवृतः ।
अश्मभिस्ताडयामास नखैर्दन्तैश्च राक्षसान् ॥१७॥

निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः ।
परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः ॥१८॥

शरैः परशुभिस्तीक्ष्णैः पट्टसैर्यष्टितोमरैः ।
जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम् ॥१९॥

स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिराक्षसाम् ।
देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥२०॥

हनूमानपि सङ्क्रुद्धः सालमुत्पाट्य पर्वतात् ।
रक्षसां कदनं चक्रे समासाद्य सहस्रशः ॥२१॥

स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्युधि ।
लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत ॥२२॥

तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ ।
शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् ॥२३॥

अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ ।
चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ ॥२४॥

न ह्यादानं न सन्धानं धनुषो वा परिग्रहः ।
न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः ॥२५॥

न मुष्टिप्रतिसन्धानं न लक्ष्यप्रतिपादनम् ।
अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ॥ २६॥

चापवेगप्रमुक्तैश्च बाणजालैः समन्ततः ।
अन्तरिक्षेऽभिसञ्छन्ने न रूपाणि चकाशिरे ।
तमसा पिहितं सर्वमासीद्भीमतरं महत् ॥ २७॥

न तदानीइ ॥म् ववौ वायुर्न जज्वाल च पावक् ।
स्वस्त्यस्तु लोकेभ्य इति जजल्पश्च महर्षयः ।
सम्पेतुश्चात्र सम्प्राप्ता गन्धर्वाः सह चारणैः ॥ २८॥

अथ राक्षससिंहस्य कृष्णान्कनकभूषणान् ।
शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् ॥ २९॥

ततोऽपरेण भल्लेन सूतस्य विचरिष्यतः ।
लाघवाद्राघवः श्रीमाञ्शिरः कायादपाहरत् ॥ ३०॥

निहतं सारथिं दृष्ट्वा समरे रावणात्मजः ।
प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह ॥ ३१॥

विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः ।
ततः परमसंहृष्टो लक्ष्मणं चाभ्यपूजयन् ॥ ३२॥

ततः प्रमाथी शरभो रभसो गन्धमादनः ।
अमृष्यमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः ॥ ३३॥

ते चास्य हयमुख्येषु तूर्णमुत्पत्य वानराः ।
चतुर्षु सुमहावीर्या निपेतुर्भीमविक्रमाः ॥ ३४॥

तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः ।
मुखेभ्यो रुधिरं व्यक्तं हयानां समवर्तत ॥ ३५॥

ते निहत्य हयांस्तस्य प्रमथ्य च महारथम् ।
पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः ॥ ३६॥

स हताश्वादवप्लुत्य रथान्मथितसारथेः ।
शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ ३७॥

ततो महेन्द्रप्रतिमंहस लक्ष्मणः
पदातिनं तं निशितैः शरोत्तमैः ।
सृजन्तमादौ निशिताञ्शरोत्तमान्
भृशं तदा बाणगणैर्न्यवारयत् ॥ ३८॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com